# गृह्यसूत्रेषु संस्काराणां संख्या

**Dr. V. Srilakshmi, Rashtriya Sanskrit Vidyapeetam, Tirupati.**

**शोधसङ्क्षिप्तिका**

श्रौतसूत्रेषु अग्निहोत्र-दर्शपूर्णमासचातुर्मास्यादि हविर्यज्ञानाम्, अग्निष्टोमादिसोमयज्ञानां चोपदेशः। धर्म सूत्रेषु तु वर्णाश्रमराजधर्माणामभिधानम्। परं गृह्यसूत्राणि हि गृहस्थं जनमनुलक्ष्य प्रवृत्तानि गार्हस्थ्यानि कर्माणि विशेषतः प्रतिपादयन्ति। एषु गर्भाधान-पुंसवन सीमन्तोन्नयनादि विवाहमध्याश्चरमकर्मान्ताः मानवस्य कृत्स्नेऽपि जीविते क्रियमाणाः संस्काराः औपासनहोमादयः सम्पूर्णस्य वत्सरस्य विशिष्टेषु कालेषु प्रत्यक्षं च क्रियमाणाः सप्तपाकयज्ञसंस्थाः, नैमित्तिकानि च गृहप्रवेशवास्त्वन्नग्रहणादि कर्माणि, शान्तिकर्माणि, पुष्टिपालकानि कर्माणि स्वरक्षोपयोगीनि अभिचारकर्माणि, किं बहुना राजकर्मादीनि तत्तद्वर्गविशेषणोपादेयानि, जीवनोपकारकाण्यदृष्टोत्पादकानि, प्रतिष्ठा जननानि, मानवस्य सर्वतोभावेनाभ्युन्नतिकराणि कर्माणि च उपदिष्टानि सन्ति। अतः गृहस्थानां जीवनसाफल्यार्थं गृह्यसूत्रसाहित्यस्य प्रामुख्यमस्ति। शोधप्रबन्धे गृह्यसूत्रवर्ण्यविषयाः, गृह्यशब्दार्थः, उपलब्धानि गृह्यसूत्राणि, गृह्यसूत्रेषु वर्णिता संस्काराणां संख्या, उपसंहारः इत्येते विषयाः प्रतिपाद्यन्ते।

**कुञ्चिकापदानि –** षोडशसंस्काराः, संस्कारः, गृह्यसूत्रम्, संख्या, अभिवृद्धिः।

**उपोद्घातः**

*गृह्यसूत्रेषु वर्ण्यविषयाः –*

शास्त्रदृष्ट्या संस्काराः गृह्यसूत्राणां विषयक्षेत्रान्तर्गताः भवन्ति। किन्तु अत्रापि संस्कारशब्दस्य प्रयोगः तस्य वास्तविकार्थे नैवोपलभ्यते। गृह्यसूत्रकाराः मीमांसकानां सम्मतार्थे एव संस्कारशब्दस्य प्रयोगं कुर्वन्ति। तथा च पंचभूसंस्काराश्चोल्लिखन्ति, गृह्यसूत्रकाले सामाजिकमनोविज्ञाने यज्ञानां विशेषप्रभावः आसीत्। अतस्ते समस्तानां गृह्यविधिविधानानां वर्गीकरणम् कृतम्। दैहिकसंस्काराणां गणना पाकयज्ञेषु आसीत्। पारस्कर गृह्यसूत्रे पाकयज्ञकर्म्मणि हुताहुत-प्रहुतप्राशितादि क्रमचतुष्टयम् वर्णितम्। बौधायन गृह्यसूत्रे पाकयज्ञकर्म्माणि सप्तधा वर्णितानि, तानि च हुतः, प्रहुतः, आहुतः, शूलगवः, बलिहरणम्, प्रत्यावरोहणम्, अष्टकाहोमादिनामानि सन्ति।

वैखानसस्मार्तसूत्रेषु दैहिकसंस्कारेषु तथा च विभिन्नवासरेषु देवार्चनार्थं क्रियमाणेषु यज्ञकर्मसु सुस्पष्टो भेदः। एतेषु गर्भाधानात् विवाहपर्यन्तं अष्टादश-शरीर-संस्कारक्रमः प्राप्यते, एतदतिरिक्त द्वाविंशयज्ञाः अपि सन्ति।

गृह्यसूत्राणि साधारणतया विवाहतः आरभ्य समावर्तनपर्यन्तं दैहिक-संस्कारकर्म्मणि निरूपयन्ति। तेषु च अधिकांशतः अन्त्येष्टिकर्माणि न वर्णयन्ति। केवलं पारस्कर आश्वलायन बोधयनादीनि गृह्यसूत्राणि सामान्यतया अन्त्येष्टिसंस्कारं वर्णयन्ति।

***गृह्यशब्दार्थः -***

गृह्यशब्दो हि विद्वद्भिर्बहुधा व्याख्यातः। आश्वलायन गृह्यव्याख्याकारेण गार्ग्यनारायणेन गृह्य शब्दस्य भार्यापरत्वमावासपरत्वं च स गृहो गृहमागतः इत्युदाहरणं स्वीकृतम्। भार्यापरत्वे हि विवाहकाले परिगृहीतो भार्यासम्बद्धोऽग्निर्गृह्याग्निस्तत्र कर्तव्यानि च कर्माणि गृह्याणीति व्यवस्थापयितुं शक्यते। गृहपरत्वेऽपि दायादयकाले गृहे परिगृहीतः स्थापितश्चाग्निर्गृह्याग्निस्तत्र कर्तव्यानि कर्माणि च गृह्याणीति सुवचं भवति। गोभिलगृह्यव्याख्याता उपर्यङ्कितमर्थद्वयं परित्यजन्नपि तृतीयं विशेषमुद्भावयति गृह्या स्मृतिः तस्यां यानि कर्माणि इतिना। ततश्च न प्रत्यक्षं श्रुत्या प्रतिपादितानि, अपि तु स्मृत्युक्तानि कर्माणि गृह्याणीति सोऽभिप्रैति।

आपस्तम्बेऽपि महर्षिः अथ कर्माणि आचाराद् यानि गृह्यन्ते इति सूत्रयन् स्मृत्याचारप्रामाण्यादि गृहीतानि कर्माणि गृह्याणीति रुचिरं व्युत्पादयति। गृह्यकर्मप्रतिपादकानि विभिन्नैराचार्यैर्विरचितानि तत्तच्छाखीयैः समादृतानि सूत्राणि गृह्यसूत्राणीत्युच्यन्ते।

***संस्कारशब्दार्थः -***

दोषमपनीय गुणाधानं हि संस्कारः। सोऽयं संस्कारसशब्दो बहुधा व्याख्यातः आचार्यैः। संस्कारो हि गुणान्तराधानमुच्यते[1] इति चरकः। संस्कारो नाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य इति शबरः।[2] संस्कारो हि नाम गुणाधानेन वा स्याद् दोषापनयनेन वा इति शंकरः।[3] योग्यतां चादधानाः क्रियाः संस्काराः इत्युच्यन्ते इति तन्त्रवार्तिकम्।

संस्कारशब्दस्य व्युत्पत्तिः सम् उपसर्गपूर्वकस्य कृञ् धातोः घञ् प्रत्यये कृते भवति। सम्+कृ+घञ्=संस्कारः।[4] संस्कारशब्दस्य प्रयोगः अनेकेष्वर्थेषु मिलति। प्रोक्षणादिजन्यसंस्कारो यज्ञाङ्गपुरोडाशेष्विति द्रव्यधर्मः भवति। स्नानाचमनादिजन्याः संस्काराः देहे उत्पद्यमानाः तदभिमानिनि जीवे कल्प्यन्ते। संस्कारशब्दार्थः संस्कारजातिविशिष्टः स्वीकरणीयः यस्य हि परिगणनं वैशेषिकदर्शने चतुर्विंशति गुणानामन्तर्गतमायाति।

---

1. सं.प.१२
2. सं.प.१२
3. संप.१२
4. श.क.द्रु. ५.२०६

संस्करणं संस्कारः, संस्कुर्वन्ति जनान् यैस्ते वा संस्कारः। यथा स्वर्णकारो वह्निना सुवर्णं संस्करोति तथैव मातृपित्राचार्यपुरोहितादयः षोडश संस्कारैर्मानवं संस्कुर्वन्ति। तथा चाह दयानन्दः-येन शरीरं मन आत्मा चोत्तमा भवन्ति सः संस्कारः इत्युच्यते। ते च निषेकादि श्मशानान्ताः षोडश प्रकाराः इति।[5] संस्काराणां हि मानवेन कश्चिद् घनिष्ठः सम्बन्धः। व्यक्तेः समाजस्य जातेः देशस्य, राष्ट्रस्य चोत्थाने संस्काराणां मुख्यप्रभावो दृश्यते।

***उपलब्धानि गृह्यसूत्राणि***

गृह्यसूत्राणि वेदेभ्यः शाखाभ्यो सम्बद्धानि। उपलब्धेषु गृह्यसूत्रेषु यजुर्वेद सम्बद्धानि गृह्यसूत्राण्यधिकानि सन्ति। ऋग्वेदीयानि आश्वलायन-शाङ्कायन-कौषीतकि गृह्याणि, यजुर्वेदीयानि(शुक्लभागे), पारस्करबोधायनापस्तम्बहिरण्यकेशिभारद्वाज मानवकाठकगृह्याणि (कृष्णभागे), सामवेदीयानि गोभिलखादिर-जैमिनीयगृह्याणि अथर्ववेदीयं च कौशिक गृह्यसूत्रमेवमेतानि सुस्पष्टतया सम्प्रत्युपलभ्यन्ते। अथैतेषां परिचयः प्रस्तूयते।

विभिन्नगृह्यसूत्रेषु, स्मृतिषु धर्मशास्त्रेषु च संस्काराणां संख्या विभिन्नैव कीर्तिता। संक्षेपेणात्र विविधग्रन्थेषु वर्णिताः संस्काराः प्रतिपाद्यन्ते। हारीतः द्विविधः एव संस्कारो भवति ब्राह्मो दैवश्च इति कथयति। गर्भाधानादि स्मार्तो ब्राह्मः। पाकयज्ञः हविर्यज्ञाश्चेति दैवः।

*आश्वलायनगृह्यसूत्रे* –त्रयोदश। १.विवाहः, २.गर्भाधानम्, ३.पुंसवनम्, ४.सीमन्तोन्नयनम्, ५.जातकर्म, ६.नामकरणम्, ७.अन्नप्राशनम्, ८.चौलम्(चूडाकर्म), ९.उपनयनम्, १०.वेदारम्भः, ११.गोदानम् (केशान्तः), १२.समावर्तनम्, १३.अन्त्येष्टिः।

*बोधायनगृह्यसूत्रे* –त्रयोदश। १.विवाहः, २.गर्भधानम्, ३.पुंसवनम्, ४.सीमन्तोन्नयनम्, ५.जातकर्म, ६.नामकरणम्, ७.उपनिष्क्रमणम्, ८.अन्नप्राशनम्, ९.चूडाकर्म, १०.कर्णवेधः, ११.उपनयनम्, १२.समावर्तनम्, १३.पितृमेधः।

*आपस्तम्बगृह्यसूत्रे* –द्वादश। १.विवाहः, २.ऋतुगमनम्, ३.पुंसवनम्, ४.सीमन्तोन्नयनम्, ५.जातकर्म, ६.नामकरणम्, ७.अन्नप्राशनम्, ८.चौलम्, ९.गोदानम् १०.उपनयनम्, ११.वेदारम्भः, १२.समावर्तनम्।

*हिरण्यकेशिगृह्यसूत्रे* –दश। १.उपनयनम्, २.वेदारम्भः, ३.समावर्तनम्, ४.विवाहः, ५.चतुर्थीकर्म, ६.सीमन्तोन्नयनम्, ७.पुंसवनम्, ८.जातकर्म, ९.चूडाकर्म १०. गोदानम्।

5. सं.प.१३

*वैखानसगृह्यसूत्रे*-अष्टादश। १.ऋतुसंगमनम्, २.गर्भादानम्, ३.सीमन्तः, ४.विष्णुबलिः, ५.जातकर्म, ६.उत्थानम्, ७.नामकरणम्, ८.अन्नप्राशनम्, ९.प्रवसागमनम्, १०.पिण्डवर्धनम्, ११.चौलकः, १२.उपनयनम्, १३.पारायणम्, १४.व्रतबन्धविसर्गः, १५.उपाकर्म, १६.उत्सर्जनम्, १७.समावर्तनम्, १८.पाणिग्रहणम्।

*वाराहगृह्यसूत्रे*-त्रयोदश। १.जातक्रम, २.नामकरणम्, ३.दन्तोद्गमनम्, ४.अन्नप्राशनम्, ५.चूडाकर्म, ६.उपनयनम्, ७.वेदव्रतानि, ८.गोदानम्, ९.समावर्तनम्, १०.विवाहः, ११.गर्भाधानम्, १२.पुंसवनम्, १३.सीमन्तोन्नयनम्।

*पारस्करगृह्यसूत्रे*-चतुर्दश। १.विवाहः, २.गर्भाधानम्, ३.पुंसवनम्, ४.सीमन्तोन्नयनम्, ५.जातकर्म, ६.नामकरणम्, ७.निष्कर्मणम्, ८.अन्नप्रासनम्, ९.चूडाकर्म, १०.कर्णवेधः, ११.उपनयनम्, १२.वेदारम्भः, १३.केशान्तः, १४.समावर्तनम्।

*गोभिलगृह्यसूत्रे*-द्वादश। १.विवाहः, २.गर्भधानम्, ३.पुंसवनम्, ४.सीमन्तकरणम्, ५.जातकर्म, ६.निष्क्रमणम्, ७.नामधेयकरणम्, ८.चूडाकरणम्, ९.उपनयनम्, १०.वेदारम्भः, ११.गोदानम्, १२.समावर्तनम्।

*खादिरगृह्यसूत्रे*-एकादश। १.विवाहः, २.गर्भधानम्, ३.पुंसवनम्, ४.सीमन्तोन्नयनम्, ५.जातकर्म, ६.निष्क्रमणम्, ७.नामकरणम्, ८.चौलः, ९.उपनयनम्, १०.वेदारम्भः, ११.गोदानम्।

जैमिनीयगृह्यसूत्रे-एकादश। १.विवाहः, २.गर्भधानम्, ३.पुंसवनम्, ४.सीमन्तोन्नयनम्, ५.जातकर्म, ६.नामकर्म, ७.प्राशनकर्म, ८.चौलकर्म, ९.उपनयनम्, १०.गोदानम्, ११.समावर्तनम्।

*कौशिकगृह्यसूत्रे*-दश। १.विवाहः, २.चतुर्थीकर्म, ३.नामकरणम्, ४.अन्नप्राशनम्, ५.निष्क्रमणम्, ६.गोदानम्, ७.चूडाकरणम्, ८.उपनयनम्, ९.वेदारम्भः, १०.पितृमेधः।

*मनुस्मृतौ*-चतुर्दश। १.गर्भाधानम्, २.जातकर्म, ३.नामकरणम्, ४.निष्क्रमणम्, ५.अन्नप्राशनम्, ६.चूडाकर्म, ७.उपनयनम्, ८.केशान्तः, ९.वेदारम्भः, १०.समावर्तनम्, ११.विवाहः, १२.वानप्रस्थः, १३.सन्यासः, १४.अन्त्येष्टिः।

*याज्ञवल्क्यस्मृतौ*-पञ्चदश। १.गर्भाधानम्, २.पुंसवनम्, ३.सीमन्तः, ४.जातकर्म, 5.नामकरणम्, ६.निष्क्रमणम्, ७.अन्नप्राशनम्, ८.चूडाकर्म, ९.उपनयनम्, १०.केशान्तः, ११.वेदारम्भः, १२.समावर्तनम्, १३.विवाहः, १४.वानप्रस्थः, १५.यतिधर्मः(संन्यासः)।

अङ्गिरस्मृतौ पञ्चविशतिसंस्काराणामुल्लेखः। गौतम अंगिरामनुयाज्ञवल्क्यादि स्मृतिषु संस्कार संगणने मतैक्यं नास्ति।

**उपसंहारः**

एतावता प्रबन्धेन इदमेवावगम्यते यत्संस्कारविषयेऽपि "नैको मुनिर्यस्य मतं न भिन्नम्" इत्युक्तिरेव संघटते। परन्तु एतेषां मध्ये षोडशसंस्काराः सर्वत्र प्रसिद्धाः व्यवहारे दृश्यन्ते। विभिन्नगृह्यसूत्राणि मनुस्मृतिंच विविच्य षोदशसंस्काराः एव स्वीकृताः। १.गर्भाधानम्, २.पुंसवनम्, ३.सीमन्तोन्नयनम्, ५.नामकरणम्, ६.निष्क्रमणम्, ७.अन्नप्रासनम्, ८.कर्णवेधः, ९.चूडाकरणम्, १०.उपनयनम्, ११.व्रतादेशः, १२.उपाकर्मोऽत्सर्गो, १३.केशान्तः, १४.स्नातकम्, १५.विवाहः, १६.अन्त्येष्टिः।

यद्यपि अन्यगृह्यसूत्रेषु संस्काराणां संख्या षोडश संख्यातो न्यूनाधिका वर्तते तथापि अस्मिन् प्रबन्धे षोडशसंस्काराणां वैशिष्ट्यं महत्त्वञ्च उच्यते। दयानन्देन वानप्रस्थः, संन्यासः च संस्कारत्वेन गणितौ। पारस्करादि गृह्यसूत्रेषु वानप्रस्थ संन्यास अन्त्येष्टि संस्काराः नैव प्राप्यन्ते। अन्ततो गत्वा संस्काराणां आचरणेन मानवस्य सर्वतोमुखाभिवृद्धिः जायते इति ऋषीणामभिमतम्।

**आधारग्रन्थाः**


१. खादिर अथवा द्राह्यायनगृह्यसूत्रं, उदयनारायण सिंहः, चौखम्भा संस्कृति प्रतिष्ठा, दिल्ली।
२. संस्कारपद्धतिः, भट्टगोपीनाथदीक्षितः, आनन्दाश्रममुद्रणालयः, पुण्याख्यपत्तनः।
३. शब्दकल्पद्रुमः(५), स्याररराजाराधाकान्तदेवः, व्याप्तिस्तमिशनयन्त्रेमुद्रितः, कलकत्ता।
४. वैदिकगृहाश्रमविधिः, डा.विक्रमकुमारः, पंजाबविश्वविद्यालयः, संस्कृतविभागः, चण्डीगढम्।



**Dr. V.Srilakshmi**
C/O, Dr.K.Viswanatha Sarma,
Department of Adwaita Vedanta,
R.S.Vidyapeetha,Tirupati.